# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेशपरीक्षा

## प्रथमपत्रिका

दिनाङ्कः – 30-8-2015 अङ्काः–100

पूर्वाह्णे – 10-00 तः 1-00 पर्यन्तम् समयः–घण्टात्रयम्

**1 एकेन वाक्येन उत्तरं लिखत :- (अष्टानाम्)** 8

1. कमलजदयिता कस्मिन् क्षेत्रे राजते ?
2. शिलागजः शुण्डया कं विचकर्ष ?
3. नीलकण्ठदीक्षितः कस्याः उपासकः आसीत् ?
4. शिवलीलार्णवे कविना कति लीलानां वर्णनं कृतम् ?
5. आख्यायिकायाः कथावस्तु कथं भवति ?
6. 'आर्यपुत्र! परित्रायस्व' इति का अवदत् ?
7. अम्बा का ?
8. शान्तनवः कः ?
9. परशुरामताडितं शान्तनवं का ररक्ष ?
10. कादम्बर्याः उत्तरभागं कः व्यलिखत् ?
11. विद्वांसमपि का खली करोति ?
12. ह्यविनीतसंपदः कथं भूताः ?

**2 वाक्यद्वयेन षण्णाम् उत्तरं लिखत :-** 12

1. पुरुरवाः केन अस्त्रेण दानवान् जितवान् ? सः कां रथमारोप्य प्रत्यानिनाय ?
2. माणवकः कः ? निपुणिका का ?
3. चन्द्रकेतुः कः ? तं रामः कथं सम्बोधयति ?
4. भवभूतिः कुत्र उवास ? तस्य कृतित्रयं लिखत ।
5. नागराजः कः ? सः कं परित्यक्तवान् ?
6. जीमूतवाहनः कं कस्मात् रक्षितुं इच्छति ? कुतः ?



पश्चादनुवर्तते

7. राज्ञा पृष्टः सिद्धः स्वगोत्रनामनी किम् आह ?
8. ''अट्टहासः'' कः ? सः केन कथं उपलब्धः ?

**3** **पञ्चषैः वाक्यैः त्रयाणाम् उत्तरं लिखत :-** 9

1. रक्तवस्त्रद्वयं कया कस्मै कुतः केन द्वारा प्रेषितम् ?
2. पुष्पभूतेः सहायकाः के ? तेषां शौर्यं कीदृशम् ?
3. समराय कुरुक्षेत्रं गतं भीष्मं भार्गवः कथम् अन्वगृह्णात् ?
4. यशोवत्याः भयकारणं ज्ञात्वा राजा किं प्रत्यूचे ?
5. सिद्धवेषधरः हरः किं किं चकार ?

**4** **त्रयाणां सप्रसङ्गं विवरणं कुरुत :-** 9

1. इदमाह स्म नृपं तपोधनः ।
2. लब्ध्वापि खलु दुःखेन परिपाल्यते ।
3. गुणलुब्धाः स्वयमेव सम्पदः ।
4. उपकृतं खलु दानवैः ।
5. माता भूयाः त्वमेव नः ।

**5** **पद्यद्वयं पूर्णं लिखत ।** 6

1. शान्त्याद्याः ....................................... मह्यम् ।।
2. सच्चिद्रूपात्मनो ............................................. मह्यम् ।।
3. स्पृहणीय ....................................... समुन्नतेः ।।

**6** **एकस्य पद्यस्य सान्वयं अर्थं लिखत :-** 4

1. नमते धरणीभूते वरं तनयं वंशकरं प्रसादयन् ।
   स्मयमानमुखाम्बुजो हरो मिषतस्तस्य पुरस्तिरोदधे ।।
2. शयितेन मातुरङ्के विश्रब्धं शैशवे न तत्प्राप्तम् ।
   लब्धं सुखं मयास्या वध्यशिलाया यदुत्सङ्गे ।।

**7** **एकस्य कवेः देश-काल-कृति-वैशिष्ट्य-विषये लिखत ।** 4

1. लक्ष्मणसूरिः 2. भारविः

**8** **चतुर्णां रूपाणि परिचाययत :-** 4

1. विराजे 2. रश्मयः 3. परिधाय
4. सङ्गिरन्ते 5. अहिपतीन् 6. वेधाः

**9** **चत्वारि पदानि वाक्ये योजयत :-** 4

1. डम्बरः 2. द्विरदः 3. नैर्घृण्यम्
4. सानवः 5. चुक्रुशुः 6. वध्यशिला

**10** **चतुर्णां पर्यायपदानि लिखत :-** 4

1. शातक्रतवी 2. वाजी 3. आयोधनम्
3. आशीविषः 5. मस्करी 6. दरी

**11** **चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत :-** 6

1. अत्यन्धकारम् 2. प्रतिपदुत्सवे 3. गच्छाम्युत
4. अस्माभिरावृता 5. सम्यगुपलक्षितं 6. नृपस्याज्ञा

**12** **चतुर्णां एकं पदं लिखत :-** 4

1. दशानां रात्रीणां समाहारः 2. तरुणतृणविशिष्टदेशः 3. निर्घृणहृदयः
4. मृगलाञ्छनः 5. गुरूपदेशं विना ज्ञातानि 6. मलयवतीभर्ता

**13** **चतुर्णां व्याकरणविशेषं लिखत :-** 8

1. कुप्यन्ति तस्मै 2. विजयन्ते 3. सुदिनायते
4. भवते रोचते 5. सन्तमसम्

**14** **चतुर्णां विग्रहवाक्यानि विलिख्य समासनाम लिखत :-** 8

1. लक्ष्मीमदः 2. विजितक्रोधस्य 3. ग्रामान्तरम्
4. मङ्गलकलशजलैः 5. मलप्रक्षालनक्षमं 6. सिद्धिभूषणः



पश्चादनुवर्तते

**15** **द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत :-** 6

1. प्रतस्थे 2. द्रष्टा 3. अमन्यत
4. आस्ताम् 5. लभन्ताम्

**16** **रिक्तस्थानं पूरयत । (चतुर्णां)** 4

1. ..................... म्रियन्ते च मादृशाः क्षुद्रजन्तवः ।
2. देव! दिष्ट्या वर्धसे ............................ ।
3. हर्षचरिते ............................उच्छ्वासाः भवन्ति ।
4. नारिकेलफलसम्मितं वचो ........................ ।
5. शमयामास स रुजः ............................ ।

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेशपरीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – 30-08-2015 | अङ्काः–50

अपराह्णे – 1-30 तः 3-00 पर्यन्तम् | समयः–सार्धैकहोरा

**1 विषयद्वयं विवृणुत ।** 2×5=10

1. भावे प्रयोगं सोदाहरणं विवृणुत ।
2. प्रेरणार्थकक्रियापदं नाम किम्? त्रिभिः उदाहरणैः विशदयत ।
3. 'क्तिन्' तथा 'ल्युट्' प्रत्ययौ सोदाहरणं विवृणुत ।

**2 द्वयोः प्रश्नयोः उत्तरं लिखत ।** 2×4=8

1. दीपकालङ्कारं सोदाहरणं विवृणुत ।
2. अव्ययीभावसमासं सोदाहरणं विवृणुत ।
3. रथोद्धता - सलक्षणं सप्रस्तारं च निरूपयत ।

**3 त्रयाणां तत्तल्लकारस्य रूपाणि पुरुषत्रये लिखत ।** 3×3=9

1. अतनुत 2. शृणोति 3. ऊचे
4. शुश्रूषते 5. कुर्यात् 6. बिभेतु

**4 चतुर्णाम् अन्यलिङ्गरूपाणि लिखत ।** 4×1=4

1. जेयः 2. गायन् 3. पाचकः
4. दाता 5. भुक्तवान् 6. दानीयः

**5 त्रयाणां प्रयोगं व्यत्यस्यत ।** 3×2=6

1. प्रवचनपटुना कृष्णकथाः अकथ्यन्त ।
2. भूतानि अन्नम् अदन्ति ।
3. त्वं धनागमतृष्णां जहीहि ।
4. विदूषकस्य वचनं शृत्वा सर्वैः अहस्यत ।



पश्चादनुवर्तते

6 **त्रयाणां विग्रहवाक्यं कृत्वा समासनाम लिखत ।** 3×1=3

| | | |
|---|---|---|
| 1. सप्तर्षयः | 2. कृच्छ्रगतः | 3. कुपुत्रः |
| 4. महावृक्षः | 5. अधिवक्षः | 6. प्रत्यहम् |

7 **क) मातृभाषया अनुवादं कुरुत ।** 5×1=5

1. आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन ।
2. तेजोमयस्य भगवतः भासा विश्वमिदं विभाति ।
3. रामः सहसा नष्टां सीतां वनेषु व्याचिनोत् ।
4. क्षुधापीडितान् गृहमागतान् अतिथीन् गृहस्थाः भोजयेयुः ।
5. भागवताः भगवतः कथाः शुश्रूषन्ते ।

8 **संस्कृतभाषया अनुवदत्** 5×1=5

1. ಋತ್ವಿಜರು ಹೋಮಕ್ಕಾಗಿ ತುಪ್ಪವನ್ನು ಕರಗಿಸುತ್ತಾರೆ.
   Preists melt the ghee for Homa.
2. ವೇಗದಿಂದ ಹರಿಯುವ ನೀರನ್ನು ಯಾರು ತಡೆದಾರು ?
   Who can ever stop the rapidly flowing water?
3. ಧರ್ಮರಾಜನು ರಾಜಸೂಯ ಯಾಗದಲ್ಲಿ ಹಸುಗಳನ್ನು ದಾನ ಮಾಡಿದನು.
   Dhamaraja gave away cows in charity during Rajasooya Yaga.
4. ಮಿತ್ರನೆ ! ಹಾಸಿಗೆಯಲ್ಲಿ ಸುಖವಾಗಿ ನಿದ್ರೆಮಾಡು.
   O' friend, sleep happily on the bed.
5. ರಾಜರು ಶತ್ರುಗಳನ್ನು ಗೆಲ್ಲಲು ಬಯಸುತ್ತಾರೆ. (ಸನ್ನಂತವನ್ನು ಬಳಸಿರಿ)
   Kings wish to win the enemies. (Use सन्नन्त)

* * * * *